# Nairatmashtaka Stotram

# नैरात्माष्टकस्तोत्रम्

## Document Information

Text title : Nairatmashtaka Stotram

File name : nairAtmAShTakastotram.itx

Category : devii, buddha, aShTaka, stotra, devI

Location : doc_devii

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# नैरात्माष्टकस्तोत्रम्

निरालम्बनिराकारनिर्विकल्पस्वरूपिणी ।
नैरात्मा वरदा देवी नित्यमेव नमोऽस्तु ते ॥ १॥

एकवक्त्रां त्रिनेत्रां च ऊर्ध्वपिङ्गलमूर्धजाम् ।
करे कर्तिकपालां च नमामि विश्वमातरीम् ॥ २॥

नवनृत्यभूषितां च सहस्रमुखरूपिणीम् ।
योगेश्वरीं योगगम्यां नमामि ज्ञानरूपिणीम् ॥ ३॥

शवारूढां महातेजां सर्वदुष्टनिकृन्तनीम् ।
सर्वपापहरां देवीं नमामि जगदीश्वरीम् ॥ ४॥

गौरीं चौरीं च वेतालीं घस्मरीं पुक्कसीं तथा ।
शबरीं चाण्डालीं डोम्बीं नमामि चाष्टयोगिनीम् ॥ ५॥

ब्रह्माविष्णुशिवशक्रचतुर्मारविनाशिनीम् ।
त्रैलोक्यमोहिनीं देवीं नमामि सुरसुन्दरीम् ॥ ६॥

अक्षमालविभूषाङ्गीमकारबीजसम्भवाम् ।
नित्यं ध्यानरतां देवीं नमामि विश्वमातरीम् ॥ ७॥

सर्वभूतप्रियां देवीं सर्वमन्त्रप्रबोधिनीम् ।
सर्वमन्त्रमयीं मातर्नैरात्मां त्वां नमाम्यहम् ॥ ८॥

इति नैरात्माष्टकस्तोत्रं सम्पूर्णम् ॥

Please send corrections to *sanskrit@cheerful.com*